# Brahmakritam 02 Vishnu Stotram

# ब्रह्मकृतं २ विष्णुस्तोत्रम्

## Document Information

Text title : Brahmakritam 02 Vishnu Stotram

File name : brahmakRRitaM02viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | puruShottamakhaNDa | adhyAya 1/16-24||

Latest update : April 27, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 27, 2025

*sanskritdocuments.org*

# ब्रह्मकृतं २ विष्णुस्तोत्रम्

ब्रह्मोवाच ।
नमस्ते जगदाधार शङ्खचक्रगदाधर ॥ १७॥

यन्नाभिपङ्कजादेव जातोऽहं विश्वसृष्टिकृत् ।
परमार्थस्वरूपं ते त्वं वै वेत्सि जगन्मय ॥ १८॥

यन्मायया जगत्सर्वं निर्मितं महदादिकम् ।
यन्निःश्वाससमुद्भूतं शब्दब्रह्म त्रिधाऽभवत् ॥ १९॥

उपजीव्य तदेवाहमसृजं भुवनानि वै ।
त्वत्तो नान्यः स्थूलसूक्ष्मदीर्घह्रस्वादि किञ्चन ॥ २.१.२०॥

विकारभेदैर्भगवंस्त्वमेवेदं चराचरम् ।
कटकादि यथा स्वर्णं गुणत्रयविभागशः ॥ २१॥

स्रष्टा सृज्यं त्वमेवात्र पोष्टा पोष्यं जगत्प्रभो ।
आधारो ध्रियमाणं च धर्त्ता त्वं परमेश्वर ॥ २२॥

त्वत्प्रेरितमतिः सर्वश्चरते च शुभाऽशुभम् ।
ततः प्राप्नोति सदृशीं त्वयैव विहितां गतिम् ॥ २३॥

जगतोऽस्य गतिर्भर्त्ता साक्षी त्वं परमेश्वर ।
चराचरगुरो सर्वजीवभूत कृपामय ।
प्रसीदाद्य जगन्नाथ नित्यं त्वच्छरण्यस्य मे ॥ २४॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे पुरुषोत्तमजगन्नाथमाहात्म्ये
प्रथमाध्यायान्तर्गतं ब्रह्मकृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । पुरुषोत्तमखण्ड । अध्याय १/१६-२४॥

skandapurANa . vaiShNavakhaNDa . puruShottamakhaNDa . adhyAya 1/16-24..

Proofread by PSA Easwaran

*Brahmakritam 02 Vishnu Stotram*

pdf was typeset on April 27, 2025

Please send corrections to *sanskrit@cheerful.com*